# Gayatrikrita Maheshvara Stuti

# ગાયત્રીકૃતા મહેશ્વરસ્તુતિઃ

## Document Information

Text title : Gayatrikrita Maheshvara Stuti

File name : maheshvarastutiHgAyatrIkRRitA.itx

Category : shiva, stuti, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 2| 57-73 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# ગાયત્રીકૃતા મહેશ્વરસ્તુતિઃ

નમો નમસ્તેઽસ્તુ મહેશ તુભ્યં નમો નમસ્તે વૃષભધ્વજાય ।
નમો નમસ્તે ગિરિજાધવાય વિદ્યાસ્વરૂપાય નમો નમસ્તે ॥ ૧॥

નમો નમસ્તે પરમાત્મને નમઃ સ્વર્ગાપવર્ગપ્રદ ભર્ગ શમ્ભો ।
ભવત્પદામ્ભોજવિલોકનેન સુખામ્બુધિર્મય્યનુવૃત્તિમાપ ॥ ૨॥

આપત્કુલં નષ્ટમનન્તમીશ ત્વત્પાદપદ્માર્પિતચિત્તવૃત્તેઃ ।
શુભાસ્પદત્વં સમવાપ્ય શમ્ભો પ્રસન્નચિત્તોઽપિ ભવેન્નરોઽપિ ॥ ૩॥

અણોરણીયાન્ મહતો મહીયાન્ આત્મા ગુહાયાં નિહિતોઽસ્ય જન્તોઃ ।
તમક્રતુઃ પશ્યતિ વીતશોકો ધાતુઃ પ્રસાદાન્મહિમાનમીશમ્ ॥ ૪॥

ઉમાસહાયં પરમેશ્વરં પ્રભું ત્રિલોચનં નીલકણ્ઠં પ્રશાન્તમ્ ।
ધ્યાત્વા મુનિર્ગચ્છતિ ભૂતયોનિં સમસ્તસાક્ષિં તમસઃ પરસ્તાત્ ॥ ૫॥

અવ્યક્તરૂપં પરમાત્મતત્ત્વં ન વેદ વેદાન્તપરિશ્રમેઽપિ ।
જ્ઞેયં પરન્ત્વીશ્વરપાદપદ્મં પ્રસાદ વિજ્ઞેયમિતિ પ્રમા મે ॥ ૬॥

ન યત્સ્વરૂપં તવ વેદદૃષ્ટં ન દૃષ્ટમીશાનસુરૈરપીદમ્ ।
મયા પરં ભાગ્યવશેન દૃષ્ટં ભાગ્યસ્ય કો વા ભગવન્નિયન્તા ॥ ૭॥

યત્પાદપદ્મસ્મરણપ્રવૃત્તાઃ કૃતાન્તવાર્તામતિદુઃસહાં તામ્ ।
વિહાય ચાનન્દજલાબ્ધિમગ્નાઃ સંસારતાપૈર્ન ચ પીડિતાઃ સ્યુઃ ॥ ૮॥

મહેશ્વર શ્રીચરણારવિન્દં નિધાય ચિત્તામ્બુજકર્ણિકાયામ્ ।
આનન્દધારાવૃતસચ્છરીરાં સુરાઃ પ્રપશ્યન્તિ નરા ન ધીરાઃ ॥ ૯॥

યદિ ક્ષણં વા શિવપાદપદ્મં હૃત્પદ્મસંવિષ્ટમતિપ્રકૃષ્ટમ્ ।
પ્રકૃષ્ટ એવાતિનિકૃષ્ટજન્માપ્યુત્કૃષ્ટજન્મા સ તુ કિં પુનઃ સ્યાત્ ॥ ૧૦॥

સ્વર્ગાપવર્ગપ્રદમીશ્વરં ત્વાં ભજન્તિ ધન્યાઃ પરમન્તરાયૈઃ ।
વિના વિમુક્તાઘપરમ્પરાસ્તે સમસ્તલોકેષુ કિલાસ્તિકાસ્તે ॥ ૧૧॥

અનન્તકલ્યાણપરમ્પરાસુ તિષ્ઠન્તિ તે શઙ્કરપૂજકાસ્તે ।
નાન્યત્ પ્રપશ્યન્તિ કદાપિ ધીરાઃ ધીરાસ્ત એવેતિ વિચારિતાશ્ચ ॥ ૧૨॥

માય પ્રસાદોઽપિ કૃતસ્ત્વયાઽયં ત્વત્પાદસન્દર્શનદાનરૂપઃ ।
આનન્દકન્દોઽયમનુક્ષણં મે સૂતે મહાનન્દનિધાનમીશ ॥ ૧૩॥

કારુણ્યપૂર્ણામ્બુધિમીશ્વર ત્વાં સ્મૃત્વાઽપિ સન્તોષમહાબ્ધિપૂર્ણાઃ ।
દૃષ્ટ્વા ભવન્તં ભગવન્તમીશ કો વા ન તૃપ્તઃ તરસા સુખેન ॥ ૧૪॥

અનુક્ષણં તસ્ય શુભાનિ શમ્ભો સુખાનિ સમ્પજ્જલરાશયોઽપિ ।
યસ્યાનપાયા ત્વયિ ભક્તિરીશ સા તાવદત્યન્તસુદુર્લભા ન ॥ ૧૫॥

યેનાપ્રમાદેન કૃતોઽસ્તિ ધર્મો મહેશ પાદાર્ચનરૂપ એવ ।
તસ્યૈવ તદ્ભક્તિશુભપ્રવાહઃ ન દુર્લભં કિં નુ સતામધીશ ॥ ૧૬॥

શમ્ભો યથા ભર્ગપદપ્રવેશો મન્ત્રે મદીયેઽપિ તથા પ્રસાદઃ ।
ભવત્વયં મે ભગવન્ વરોઽસ્ય વરત્વમિત્યેવ મતિર્મમાસ્તુ ॥ ૧૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ગાયત્રીકૃતા મહેશ્વરસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૨। ૫૭-૭૩ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 2. 57-73 ..

Proofread by Ruma Dewan

*Gayatrikrita Maheshvara Stuti*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*